# Sanghavatadibhih Kritam Hari Stotram

# સઙ્ઘવાટાદિભિઃ કૃતં હરિસ્તોત્રમ્

## Document Information

Text title : Sanghavatadibhih Kritam Hari Stotram

File name : sanghavATAdibhiHkRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 70/80-96||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

Sanghavatadibhih Kritam Hari Stotram

# સઙ્ઘવાટાદિભિઃ કૃતં હરિસ્તોત્રમ્

દ્રુતં તે મૂષકદેહાઁસ્ત્યક્ત્વા વૈ મણ્ડપાન્તરે ॥ ૮૦॥

સુદિવ્યા દેવવજ્જાતા દેવા દેવ્યશ્ચ શોભનાઃ ।
સર્વે ષોડશવર્ષાશ્ચ ભાસમાનાઃ પ્રભાવિણઃ ॥ ૮૧॥

તુષ્ટુવુઃ પરમાત્માનં સંહિતાસ્થં હરિં પ્રભુમ્ ।
“નમો મોક્ષપ્રદાનાં તુ સતાં લક્ષ્યૈકબિન્દવે ॥ ૮૨॥

મુક્તાનાં ધ્યાનલક્ષ્યાય સર્વાવતારિણે નમઃ ।
નમઃ કૃષ્ણાય કૃષ્ણાદિસ્વામિને પરમાત્મને ॥ ૮૩॥

બાલકૃષ્ણાય કાન્તાય સર્વકાન્તાય રક્ષિણે ।
શ્રીશાય કમલેશાય રાધેશાય વિહારિણે ॥ ૮૪॥

નમો દેવાધિવાસાય સર્વાન્તર્યામિણે નમઃ ।
નમોઽનાદિનિધનાય મોક્ષદાત્રે કૃપાલવે ॥ ૮૫॥

નમઃ શ્રીલોમશાયાઽપિ સદ્ભ્યશ્ચાપિ નમો નમઃ ।
નમો વ્યાસાય દિવ્યાય સ્વયમ્પ્રકાશિને નમઃ ॥ ૮૬॥

નમઃ પદ્માવતીલક્ષ્મીપ્રજ્ઞાભૂપતયે નમઃ ।
નમસ્તસ્મૈ હૃદિસ્થાય ધામસ્થાય ચ તે નમઃ ॥ ૮૭॥

પ્રસાદાય નમશ્ચાપિ મણ્ડપાય ચ વૈ નમઃ ।
નમો મણ્ડપદેવેભ્યો નમઃ શ્રવણિભ્યસ્તથા ॥ ૮૮॥

તારકેભ્યઃ પાવકેભ્યઃ સદ્ભ્યઃ સદા નમો નમઃ ।
સાધ્વીભ્યશ્ચ સતીભ્યશ્ચ વૈષ્ણવેભ્યો નમો નમઃ” ॥ ૮૯॥

વયં પાપાઃ પ્રસાદેનોદ્ધૃતા યદૃચ્છયા ત્વિહ ।
કૃપયા દિવ્યતાં પ્રાપ્તાઃ સતાં દર્શનતસ્તથા ॥ ૯૦॥

જાતિસ્મરાઃ સ્મ સઞ્જાતાઃ કથાસ્થાનપ્રભાવતઃ ।

પુનર્જન્મ ન ચેચ્છામશ્ચેચ્છામઃ શાશ્વતાઽક્ષરમ્ ॥ ૯૧॥

સ્વપ્રકાશો હિ ભગવાન્ દદાતુ મન્ત્રમુત્તમમ્ ।
નામધુન્યં પ્રદદાતુ યેન યાસ્યામ ઉત્તમમ્ ॥ ૯૨॥

અક્ષરં પરમં ધામ પરમેશ્વરરાજિતમ્ ।
ઇત્યેવં બદ્રિકે તે સમ્પ્રાર્થયામાસુરુત્સુકાઃ ॥ ૯૩॥

સ્વપ્રકાશો હિ ભગવાન્ દદૌ તેભ્યો મનું તદા ।
"ૐ નમઃ શ્રીકૃષ્ણનારાયણાય પતયે સ્વાહા" ॥ ૯૪॥

પ્રભો નારાયણ પદ્માવતીનારાયણ પ્રભો ।
જયાકૃષ્ણ લલિતાશ્રીકૃષ્ણ રાધાપતે વિભો" ॥ ૯૫॥

ધુન્યં દદૌ તદા તેભ્યસ્તેઽપિ ચક્રુઃ પ્રકીર્તનમ્ ।
એકતાના અભવઁશ્ચ શ્રીકૃષ્ણે વલ્લભે પ્રભૌ ॥ ૯૬॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય ચતુર્થખણ્ડે
૭૦-અધ્યાયાન્તર્ગતં મૂષકજન્માન્મુક્તૈઃ સઙ્ઘવાટાદિભિઃ કૃતં
હરિસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૭૦/૮૦-૯૬॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 70/80-96..

Proofread by PSA Easwaran

*Sanghavatadibhih Kritam Hari Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*